# aparAdhakShamApaNastotram

# અપરાધક્ષમાપણસ્તોત્રમ્

## Document Information

Text title : aparAdhakShamApanA from Durga Spatashati or Devi Mahatmya

File name : aparaadhakshamaa.itx

Category : aparAdhakShamA, devii, durgA, devI

Location : doc_devii

Author : Traditional

Transliterated by : Smt. K. Shankaran (achintya at ican.net)

Proofread by : Sunder Hattangadi

Description-comments : Verses for devi durga

Latest update : June 20, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# અપરાધક્ષમાપણસ્તોત્રમ્

ૐ અપરાધશતં કૃત્વા જગદમ્બેતિ ચોચ્ચરેત્ ।
યાં ગતિં સમવાપ્નોતિ ન તાં બ્રહ્માદયઃ સુરાઃ  ॥ ૧॥

સાપરાધોઽસ્મિ શરણં પ્રાપ્તસ્ત્વાં જગદમ્બિકે ।
ઇદાનીમનુકમ્પ્યોઽહં યથેચ્છસિ તથા કુરુ  ॥ ૨॥

અજ્ઞાનાદ્વિસ્મૃતેર્ભ્રાન્ત્યા યન્ન્યૂનમધિકં કૃતમ્ ।
તત્સર્વં ક્ષમ્યતાં દેવિ પ્રસીદ પરમેશ્વરિ  ॥ ૩॥

કામેશ્વરિ જગન્માતઃ સચ્ચિદાનન્દવિગ્રહે ।
ગૃહાણાર્ચામિમાં પ્રીત્યા પ્રસીદ પરમેશ્વરિ  ॥ ૪॥

સર્વરૂપમયી દેવી સર્વં દેવીમયં જગત્ ।
અતોઽહં વિશ્વરૂપાં ત્વાં નમામિ પરમેશ્વરીમ્  ॥ ૫॥

યદક્ષરં પરિભ્રષ્ટં માત્રાહીનઞ્ચ યદ્ભવેત્ ।
પૂર્ણં ભવતુ તત્ સર્વં ત્વત્પ્રસાદાન્મહેશ્વરિ  ॥ ૬॥

યદત્ર પાઠે જગદમ્બિકે મયા
    વિસર્ગબિન્દ્વક્ષરહીનમીરિતમ્ ।
તદસ્તુ સમ્પૂર્ણતમં પ્રસાદતઃ
    સઙ્કલ્પસિદ્ધિશ્ચ સદૈવ જાયતામ્  ॥ ૭॥

યન્માત્રાબિન્દુબિન્દુદ્વિતયપદપદદ્વન્દ્વવર્ણાદિહીનં
ભક્ત્યાભક્ત્યાનુપૂર્વં  પ્રસભકૃતિવશાત્ વ્યક્તમવ્યક્તમમ્બ ।
મોહાદજ્ઞાનતો વા પઠિતમપઠિતં સામ્પ્રતં  તે સ્તવેઽસ્મિન્
તત્ સર્વં સાઙ્ગમાસ્તાં ભગવતિ વરદે ત્વત્પ્રસાદાત્ પ્રસીદ  ॥ ૮॥

પ્રસીદ ભગવત્યમ્બ પ્રસીદ ભક્તવત્સલે ।
પ્રસાદં કુરુ મે દેવિ દુર્ગે દેવિ નમોઽસ્તુ તે  ॥ ૯॥

॥ ઇતિ અપરાધક્ષમાપણસ્તોત્રં સમાપ્તમ્ ॥

Encoded by Smt. K. Shankaran (achintya at ican.net)
Proofread by Sunder Hattangadi

---

*aparAdhakShamApaNastotram*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*